# Sankshepamayanam

# સઙ્ક્ષેપરામાયણમ્

## Document Information

Text title : Sankshiptaramayanam Sankshepamayanam

File name : saNkShiptarAmAyaNam.itx

Category : raama

Location : doc_raama

Author : Traditional

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan, NA, Sowmya Krishnapur sowmya.krishnapur at gmail.com

Description-comments : From Brihatstotraratnakara with 408 stotras

Latest update : June 5, 2016, May 15, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# સઙ્ક્ષેપરામાયણમ્

શ્રીગણેશાય નમઃ ।
॥ શ્રીઃ ॥

અથ સઙ્ક્ષેપરામાયણમ્ ।
તપઃસ્વાધ્યાયનિરતં તપસ્વી વાગ્વિદાં વરમ્ ।
નારદં પરિપપ્રચ્છ વાલ્મીકિર્મુનિપુઙ્ગવમ્ ॥ ૧॥

કો ન્વસ્મિન્સામ્પ્રતં લોકે ગુણવાન્કશ્ચ વીર્યવાન્ ।
ધર્મજ્ઞશ્ચ કૃતજ્ઞશ્ચ સત્યવાક્યો દૃઢવ્રતઃ ॥ ૨॥

ચારિત્રેણ ચ કો યુક્તઃ સર્વભૂતેષુ કો હિતઃ ।
વિદ્વાન્ કઃ કઃ સમર્થશ્ચ કશ્ચૈકપ્રિયદર્શનઃ ॥ ૩॥

આત્મવાન્કો જિતક્રોધો દ્યુતિમાન્કોઽનસૂયકઃ ।
કસ્ય બિભ્યતિ દેવાશ્ચ જાતરોષસ્ય સંયુગે ॥ ૪॥

એતદિચ્છામ્યહં શ્રોતું પરં કૌતૂહલં હિ મે ।
મહર્ષે ત્વં સમર્થોઽસિ જ્ઞાતુમેવંવિધં નરમ્ ॥ ૫॥

શ્રુત્વા ચૈતત્ત્રિલોકજ્ઞો વાલ્મીકેર્નારદો વચઃ ।
શ્રૂયતામિતિ ચામન્ત્ર્ય પ્રહૃષ્ટો વાક્યમબ્રવીત્ ॥ ૬॥

બહવો દુર્લભાશ્ચૈવ યે ત્વયા કીર્તિતા ગુણાઃ ।
મુને વક્ષ્યામ્યહં બુદ્ધ્વા તૈર્યુક્તઃ શ્રૂયતાં નરઃ ॥ ૭॥

ઇક્ષ્વાકુવંશપ્રભવો રામો નામ જનૈઃ શ્રુતઃ ।
નિયતાત્મા મહાવીર્યો દ્યુતિમાન્ધૃતિમાન્વશી ॥ ૮॥

બુદ્ધિમાન્નીતિમાન્ વાગ્મી શ્રીમાઞ્છત્રુનિબર્હણઃ ।
વિપુલાંસો મહાબાહુઃ કમ્બુગ્રીવો મહાહનુઃ ॥ ૯॥

મહોરસ્કો મહેષ્વાસો ગૂઢજત્રુરરિન્દમઃ ।

આજાનુબાહુઃ સુશિરાઃ સુલલાટઃ સુવિક્રમઃ ॥ ૧૦॥

સમઃ સમવિભક્તાઙ્ગઃ સ્નિગ્ધવર્ણઃ પ્રતાપવાન્ ।
પીનવક્ષા વિશાલાક્ષો લક્ષ્મીવાઞ્છુભલક્ષણઃ ॥ ૧૧॥

ધર્મજ્ઞઃ સત્યસન્ધશ્ચ પ્રજાનાં ચ હિતે રતઃ ।
યશસ્વી જ્ઞાનસમ્પન્નઃ શુચિર્વશ્યઃ સમાધિમાન્ ॥ ૧૨॥

પ્રજાપતિસમઃ શ્રીમાન્ ધાતા રિપુનિષૂદનઃ ।
રક્ષિતા જીવલોકસ્ય ધર્મસ્ય પરિરક્ષિતા ॥ ૧૩॥

રક્ષિતા સ્વસ્ય ધર્મસ્ય સ્વજનસ્ય ચ રક્ષિતા ।
વેદવેદાઙ્ગતત્ત્વજ્ઞો ધનુર્વેદે ચ નિષ્ઠિતઃ ॥ ૧૪॥

સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞઃ સ્મૃતિમાન્પ્રતિભાનવાન્ ।
સર્વલોકપ્રિયઃ સાધુરદીનાત્મા વિચક્ષણઃ ॥ ૧૫॥

સર્વદાઽભિગતઃ સદ્ભિઃ સમુદ્ર ઇવ સિન્ધુભિઃ ।
આર્યઃ સર્વસમશ્ચૈવ સદૈવ પ્રિયદર્શનઃ ॥ ૧૬॥

સ ચ સર્વગુણોપેતઃ કૌસલ્યાનન્દવર્ધનઃ ।
સમુદ્ર ઇવ ગામ્ભીર્યે ધૈર્યેણ હિમવાનિવ ॥ ૧૭॥

વિષ્ણુના સદૃશો વીર્યે સોમવત્પ્રિયદર્શનઃ ।
કાલાગ્નિસદૃશઃ ક્રોધે ક્ષમયા પૃથિવીસમઃ ॥ ૧૮॥

ધનદેન સમસ્ત્યાગે સત્યે ધર્મ ઇવાપરઃ ।
તમેવઙ્ગુણસમ્પન્નં રામં સત્યપરાક્રમમ્ ॥ ૧૯॥

જ્યેષ્ઠં શ્રેષ્ઠગુણૈર્યુક્તં પ્રિયં દશરથઃ સુતમ્ ।
પ્રકૃતીનાં હિતૈર્યુક્તં પ્રકૃતિપ્રિયકામ્યયા ॥ ૨૦॥

યૌવરાજ્યેન સંયોક્તુમૈચ્છત્પ્રીત્યા મહીપતિઃ ।
તસ્યાભિષેકસમ્ભારાન્ દૃષ્ટ્વા ભાર્યાઽથ કૈકયી ॥ ૨૧॥

પૂર્વં દત્તવરા દેવી વરમેનમયાચત ।
વિવાસનં ચ રામસ્ય ભરતસ્યાભિષેચનમ્ ॥ ૨૨॥

સ સત્યવચનાદ્રાજા ધર્મપાશેન સંયતઃ ।
વિવાસયામાસ સુતં રામં દશરથઃ પ્રિયમ્ ॥ ૨૩॥

સ જગામ વનં વીરઃ પ્રતિજ્ઞામનુપાલયન્ ।
પિતુર્વચનનિર્દેશાત્કૈકેય્યાઃ પ્રિયકારણાત્ ॥ ૨૪॥

તં વ્રજન્તં પ્રિયો ભ્રાતા લક્ષ્મણોઽનુજગામ હ ।
સ્નેહાદ્વિનયસમ્પન્નઃ સુમિત્રાનન્દવર્ધનઃ ॥ ૨૫॥

ભ્રાતરં દયિતો ભ્રાતુઃ સૌભ્રાત્રમનુદર્શયન્ ।
રામસ્ય દયિતા ભાર્યા નિત્યં પ્રાણસમા હિતા ॥ ૨૬॥

જનકસ્ય કુલે જાતા દેવમાયેવ નિર્મિતા ।
સર્વલક્ષણસમ્પન્ના નારીણામુત્તમા વધૂઃ ॥ ૨૭॥

સીતાપ્યનુગતા રામં શશિનં રોહિણી યથા ।
પૌરૈરનુગતો દૂરં પિત્રા દશરથેન ચ ॥ ૨૮॥

શૃઙ્ગવેરપુરે સૂતં ગઙ્ગાકૂલે વ્યસર્જયત્ ।
ગુહમાસાદ્ય ધર્માત્મા નિષાદાધિપતિં પ્રિયમ્ ॥ ૨૯॥

ગુહેન સહિતો રામો લક્ષ્મણેન ચ સીતયા ।
તે વનેન વનં ગત્વા નદીસ્તીર્ત્વા બહૂદકાઃ ॥ ૩૦॥

ચિત્રકૂટમનુપ્રાપ્ય ભરદ્વાજસ્ય શાસનાત્ ।
રમ્યમાવસથં કૃત્વા રમમાણા વને ત્રયઃ ॥ ૩૧॥

દેવગન્ધર્વસઙ્કાશાસ્તત્ર તે ન્યવસન્ સુખમ્ ।
ચિત્રકૂટં ગતે રામે પુત્રશોકાતુરસ્તદા ॥ ૩૨॥

રાજા દશરથઃ સ્વર્ગં જગામ વિલપન્ સુતમ્ ।
મૃતે તુ તસ્મિન્ ભરતો વસિષ્ઠપ્રમુખૈર્દ્વિજૈઃ ॥ ૩૩॥

નિયુજ્યમાનો રાજ્યાય નૈચ્છદ્રાજ્યં મહાબલઃ ।
સ જગામ વનં વીરો રામપાદપ્રસાદકઃ ॥ ૩૪॥

ગત્વા તુ સ મહાત્માનં રામં સત્યપરાક્રમમ્ ।
અયાચદ્ભ્રાતરં રામમાર્યભાવપુરસ્કૃતઃ ॥ ૩૫॥

ત્વમેવ રાજા ધર્મજ્ઞ ઇતિ રામં વચોઽબ્રવીત્ ।
રામોઽપિ પરમોદારઃ સુમુખઃ સુમહાયશાઃ ॥ ૫૬॥

ન ચૈચ્છત્પિતુરાદેશાદ્રાજ્યં રામો મહાબલઃ ।
પાદુકે ચાસ્ય રાજ્યાય ન્યાસં દત્ત્વા પુનઃ પુનઃ ॥ ૩૭॥

નિવર્તયામાસ તતો ભરતં ભરતાગ્રજઃ ।
સ કામમનવાપ્યૈવ રામપાદાવુપસ્પૃશન્ ॥ ૩૮॥

નન્દિગ્રામેઽકરોદ્રાજ્યં રામાગમનકાઙ્ક્ષયા ।
ગતે તુ ભરતે શ્રીમાન્સત્યસન્ધો જિતેન્દ્રિયઃ ॥ ૩૯॥

રામસ્તુ પુનરાલક્ષ્ય નાગરસ્ય જનસ્ય ચ ।
તત્રાગમનમેકાગ્રો દણ્ડકાન્ પ્રવિવેશ હ ॥ ૪૦॥

પ્રવિશ્ય તુ મહારણ્યં રામો રાજીવલોચનઃ ।
વિરાધં રાક્ષસં હત્વા શરભઙ્ગં દદર્શ હ ॥ ૪૧॥

સુતીક્ષ્ણં ચાપ્યગસ્ત્યં ચ અગસ્ત્યભ્રાતરં તથા ।
અગસ્ત્યવચનાચ્ચૈવ જગ્રાહૈન્દ્રં શરાસનમ્ ॥ ૪૨॥

ખડ્ગં ચ પરમપ્રીતસ્તૂણી ચાક્ષયસાયકૌ ।
વસતસ્તસ્ય રામસ્ય વને વનચરૈઃ સહ ॥ ૪૩॥

ઋષયોઽભ્યાગમન્સર્વે વધાયાસુરરક્ષસામ્ ।
સ તેષાં પ્રતિશુશ્રાવ રાક્ષસાનાં તદા વને ॥ ૪૪॥

પ્રતિજ્ઞાતશ્ચ રામેણ વધઃ સંયતિ રક્ષસામ્ ।
ઋષીણામગ્નિકલ્પાનાં દણ્ડકારણ્યવાસિનામ્ ॥ ૪૫॥

તેન તત્રૈવ વસતા જનસ્થાનનિવાસિની ।
વિરૂપિતા શૂર્પણખા રાક્ષસી કામરૂપિણી ॥ ૪૬॥

તતઃ શૂર્પણખાવાક્યાદુદ્યુક્તાન્સર્વરાક્ષસાન્ ।
ખરં ત્રિશિરસં ચૈવ દૂષણં ચૈવ રાક્ષસમ્ ॥ ૪૭॥

નિજઘાન રણે રામસ્તેષાં ચૈવ પદાનુગાન્ ।
વને તસ્મિન્નિવસતા જનસ્થાનનિવાસિનામ્ ॥ ૪૮॥

રક્ષસાં નિહતાન્યાસન્સહસ્રાણિ ચતુર્દશ ।
તતો જ્ઞાતિવધં શ્રુત્વા રાવણઃ ક્રોધમૂર્છિતઃ ॥ ૪૯॥

સહાયં વરયામાસ મારીચં નામ રાક્ષસમ્ ।
વાર્યમાણઃ સુબહુશો મારીચેન સ રાવણઃ ॥ ૫૦॥

ન વિરોધો બલવતા ક્ષમો રાવણ તેન તે ।

અનાદૃત્ય તુ તદ્વાક્યં રાવણઃ કાલચોદિતઃ ॥ ૫૧॥

જગામ સહમારીચસ્તસ્યાશ્રમપદં તદા ।
તેન માયાવિના દૂરમપવાહ્ય નૃપાત્મજૌ ॥ ૫૨॥

જહાર ભાર્યાં રામસ્ય ગૃધ્રં હત્વા જટાયુષમ્ ।
ગૃધ્રં ચ નિહતં દૃષ્ટ્વા હૃતાં શ્રુત્વા ચ મૈથિલીમ્ ॥ ૫૩॥

રાઘવઃ શોકસન્તપ્તો વિલલાપાકુલેન્દ્રિયઃ ।
તતસ્તેનૈવ શોકેન ગૃધ્રં દગ્ધ્વા જટાયુષમ્ ॥ ૫૪॥

માર્ગમાણો વને સીતાં રાક્ષસં સન્દદર્શ હ ।
કબન્ધં નામ રૂપેણ વિકૃતં ઘોરદર્શનમ્ ॥ ૫૫॥

તન્નિહત્ય મહાબાહુર્દદાહ સ્વર્ગતશ્ચ સઃ ।
સ ચાસ્ય કથયામાસ શબરીં ધર્મચારિણીમ્ ॥ ૫૬॥

શ્રમણાં ધર્મનિપુણામભિગચ્છેતિ રાઘવ ।
સોઽભ્યગચ્છન્મહાતેજાઃ શબરીં શત્રુસૂદનઃ ॥ ૫૭॥

શબર્યા પૂજિતઃ સમ્યગ્રામો દશરથાત્મજઃ ।
પમ્પાતીરે હનુમતા સઙ્ગતો વાનરેણ હ ॥ ૫૮॥

હનૂમદ્વચનાચ્ચૈવ સુગ્રીવેણ સમાગતઃ ।
સુગ્રીવાય ચ તત્સર્વં શંસદ્રામો મહાબલઃ ॥ ૫૯॥

આદિતસ્તદ્યથાવૃત્તં સીતાયાશ્ચ વિશેષતઃ ।
સુગ્રીવશ્ચાપિ તત્સર્વં શ્રુત્વા રામસ્ય વાનરઃ ॥ ૬૦॥

ચકાર સખ્યં રામેણ પ્રીતશ્ચૈવાગ્નિસાક્ષિકમ્ ।
તતો વાનરરાજેન વૈરાનુકથનં પ્રતિ ॥ ૬૧॥

રામાયાવેદિતં સર્વં પ્રણયાદ્દુઃખિતેન ચ ।
પ્રતિજ્ઞાતં ચ રામેણ તદા વાલિવધં પ્રતિ ॥ ૬૨॥

વાલિનશ્ચ બલં તત્ર કથયામાસ વાનરઃ ।
સુગ્રીવઃ શઙ્કિતશ્ચાસીન્નિત્યં વીર્યેણ રાઘવે ॥ ૬૩॥

રાઘવપ્રત્યયાર્થં તુ દુન્દુભેઃ કાયમુત્તમમ્ ।
દર્શયામાસ સુગ્રીવો મહાપર્વતસન્નિભમ્ ॥ ૬૪॥

ઉત્સ્મયિત્વા મહાબાહુઃ પ્રેક્ષ્ય ચાસ્થિ મહાબલઃ ।
પાદાઙ્ગુષ્ઠેન ચિક્ષેપ સમ્પૂર્ણં દશયોજનમ્ ॥ ૬૫॥

બિભેદ ચ પુનસ્તાલાન્ સપ્તૈકેન મહેષુણા ।
ગિરિં રસાતલં ચૈવ જનયન્પ્રત્યયં તદા ॥ ૬૬॥

તતઃ પ્રીતમનાસ્તેન વિશ્વસ્તઃ સ મહાકપિઃ
કિષ્કિન્ધાં રામસહિતો જગામ ચ ગુહાં તદા ॥ ૬૭॥

તતોઽગર્જદ્ધરિવરઃ સુગ્રીવો હેમપિઙ્ગલઃ ।
તેન નાદેન મહતા નિર્જગામ હરીશ્વરઃ ॥ ૬૮॥

અનુમાન્ય તદા તારાં સુગ્રીવેણ સમાગતઃ ।
નિજઘાન ચ તત્રૈવ શરેણૈકેન રાઘવઃ ॥ ૬૯॥

તતઃ સુગ્રીવવચનાદ્ધત્વા વાલિનમાહવે ।
સુગ્રીવમેવ તદ્રાજ્યે રાઘવઃ પ્રત્યપાદયત્ ॥ ૭૦॥

સ ચ સર્વાન્ સમાનીય વાનરાન્ વાનરર્ષભઃ ।
દિશઃ પ્રસ્થાપયામાસ દિદૃક્ષુર્જનકાત્મજામ્ ॥ ૭૧॥

તતો ગૃધ્રસ્ય વચનાત્સમ્પાતેર્હનુમાન્બલી ।
શતયોજનવિસ્તીર્ણં પુપ્લુવે લવણાર્ણવમ્ ॥ ૭૨॥

તત્ર લઙ્કાં સમાસાદ્ય પુરીં રાવણપાલિતામ્ ।
દદર્શ સીતાં ધ્યાયન્તીમશોકવનિકાં ગતામ્ ॥ ૭૩॥

નિવેદયિત્વાઽભિજ્ઞાનં પ્રવૃત્તિં વિનિવેદ્ય ચ ।
સમાશ્વાસ્ય ચ વૈદેહીં મર્દયામાસ તોરણમ્ ॥ ૭૪॥

પઞ્ચ સેનાગ્રગાન્ હત્વા સપ્ત મન્ત્રિસુતાનપિ ।
શૂરમક્ષં ચ નિષ્પિષ્ય ગ્રહણં સમુપાગમત્ ॥ ૭૫॥

અસ્ત્રેણોન્મુક્તમાત્માનં જ્ઞાત્વા પૈતામહાદ્વરાત્ ।
મર્ષયન્રાક્ષસાન્વીરો યન્ત્રિણસ્તાન્યદૃચ્છયા ॥ ૭૬॥

તતો દગ્ધ્વા પુરીં લઙ્કામૃતે સીતાં ચ મૈથિલીમ્ ।
રામાય પ્રિયમાખ્યાતું પુનરાયાન્મહાકપિઃ ॥ ૭૭॥

સોઽભિગમ્ય મહાત્માનં કૃત્વા રામં પ્રદક્ષિણમ્ ।
ન્યવેદયદમેયાત્મા દૃષ્ટા સીતેતિ તત્ત્વતઃ ॥ ૭૮॥

તતઃ સુગ્રીવસહિતો ગત્વા તીરં મહોદધેઃ ।
સમુદ્રં ક્ષોભયામાસ શરૈરાદિત્યસન્નિભૈઃ ॥ ૭૯॥

દર્શયામાસ ચાત્માનં સમુદ્રઃ સરિતાં પતિઃ ।
સમુદ્રવચનાચ્ચૈવ નલં સેતુમકારયત્ ॥ ૮૦॥

તેન ગત્વા પુરીં લઙ્કાં હત્વા રાવણમાહવે ।
રામઃ સીતામનુપ્રાપ્ય પરાં વ્રીડામુપાગમત્ ॥ ૮૧॥

તામુવાચ તતો રામઃ પરુષં જનસંસદિ ।
અમૃષ્યમાણા સા સીતા વિવેશ જ્વલનં સતી ॥ ૮૨॥

તતોઽગ્નિવચનાત્સીતાં જ્ઞાત્વા વિગતકલ્મષામ્ ।
કર્મણા તેન મહતા ત્રૈલોક્યં સચરાચરમ્ ॥ ૮૩॥

સદેવર્ષિગણં તુષ્ટં રાઘવસ્ય મહાત્મનઃ ।
બભૌ રામઃ સંપ્રહૃષ્ટઃ પૂજિતઃ સર્વદૈવતૈઃ ॥ ૮૪॥

અભિષિચ્ય ચ લઙ્કાયાં રાક્ષસેન્દ્રં વિભીષણમ્ ।
કૃતકૃત્યસ્તદા રામો વિજ્વરઃ પ્રમુમોદ હ ॥ ૮૫॥

દેવતાભ્યો વરં પ્રાપ્ય સમુત્થાપ્ય ચ વાનરાન્ ।
અયોધ્યાં પ્રસ્થિતો રામઃ પુષ્પકેણ સુહૃદ્વૃતઃ ॥ ૮૬॥

ભરદ્વાજાશ્રમં ગત્વા રામઃ સત્યપરાક્રમઃ ।
ભરતસ્યાન્તિકે રામો હનૂમન્તં વ્યસર્જયત્ ॥ ૮૭॥

પુનરાખ્યાયિકાં જલ્પન્ સુગ્રીવસહિતસ્તદા ।
પુષ્પકં તત્સમારુહ્ય નન્દિગ્રામં યયૌ તદા ॥ ૮૮॥

નન્દિગ્રામે જટાં હિત્વા ભ્રાતૃભિઃ સહિતોઽનઘઃ ।
રામઃ સીતામનુપ્રાપ્ય રાજ્યં પુનરવાપ્તવાન્ ॥ ૮૯॥

પ્રહૃષ્ટમુદિતો લોકસ્તુષ્ટઃ પુષ્ટઃ સુધાર્મિકઃ ।
નિરામયો હ્યરોગશ્ચ દુર્ભિક્ષભયવર્જિતઃ ॥ ૯૦॥

ન પુત્રમરણં કેચિદ્ દ્રક્ષ્યન્તિ પુરુષાઃ ક્વચિત્ ।
નાર્યશ્ચાવિધવા નિત્યં ભવિષ્યન્તિ પતિવ્રતાઃ ॥ ૯૧॥

ન ચાગ્નિજં ભયં કિઞ્ચિન્નાપ્સુ મજ્જન્તિ જન્તવઃ ।

ન વાતજં ભયં કિઞ્ચિન્નાપિ જ્વરકૃતં તથા ॥ ૯૨॥

ન ચાપિ ક્ષુદ્ભયં તત્ર ન તસ્કરભયં તથા ।
નગરાણિ ચ રાષ્ટ્રાણિ ધનધાન્યયુતાનિ ચ ॥ ૯૩॥

નિત્યં પ્રમુદિતાઃ સર્વે યથા કૃતયુગે તથા ।
અશ્વમેધશતૈરિષ્ટ્વા બહુવસ્ત્રસુવર્ણકૈઃ ॥ ૯૪॥

ગવાં કોટ્યયુતં દત્ત્વા બ્રહ્મલોકં ગમિષ્યતિ ।
અસઙ્ખ્યેયં ધનં દત્ત્વા બ્રાહ્મણેભ્યો મહાયશાઃ ॥ ૯૫॥

રાજવંશાઞ્છતગુણાન્સ્થાપયિષ્યતિ રાઘવઃ ।
ચાતુર્વર્ણ્યં ચ લોકેઽસ્મિન્ સ્વે સ્વે ધર્મે નિયોક્ષ્યતિ ॥ ૯૬॥

દશવર્ષસહસ્રાણિ દશવર્ષશતાનિ ચ ।
રામો રાજ્યમુપાસિત્વા બ્રહ્મલોકં ગમિષ્યતિ ॥ ૯૭॥

ઇદં પવિત્રં પાપઘ્નં પુણ્યં વેદૈશ્ચ સમ્મિતમ્ ।
યઃ પઠેદ્રામચરિતં સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૯૮॥

એતદાખ્યાનમાયુષ્યં પઠન્રામાયણં નરઃ ।
સપુત્રપૌત્રઃ સગણઃ પ્રેત્ય સ્વર્ગે મહીયતે ॥ ૯૯॥

પઠન્દ્વિજો વાગૃષભત્વમીયાત્ સ્યાત્ ક્ષત્રિયો ભૂમિપતિત્વમીયાત્ ।
વણિગ્જનઃ પણ્યફલત્વમીયાજ્જનશ્ચ શૂદ્રોઽપિ મહત્ત્વમીયાત્ ॥ ૧૦૦॥

ઇત્યાર્ષે શ્રીમદ્રામાયણે વાલ્મીકીયે આદિકાવ્યે બાલકાણ્ડે
સઙ્ક્ષેપરામાયણં નામ પ્રથમઃ સર્ગઃ ।

Proofread by Nat Natarajan, NA, Sowmya Krishnapur sowmya.krishnapur at gmail.com

---

*Sankshepramayanam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*